# Dhvajarohanavarnanam

# ધ્વજારોહણવર્ણનમ્

## Document Information

Text title : Dhvajarohanavarnanam

File name : dhvajArohaNavarNanam.itx

Category : misc, bRRihannAradIyapurANa

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 19/22-38||

Latest update : October 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 26, 2024

*sanskritdocuments.org*

# ધ્વજારોહણવર્ણનમ્

દેવસ્ય દ્વારદેશે વા શિખરે વા મુદાન્વિતઃ ।
સુસ્થિરં સ્થાપયેદ્વિપ્ર ધ્વજં સસ્તમ્ભસંયુતમ્ ॥ ૧૯-૧૯॥

ગન્ધપુષ્પાક્ષતૈર્દેવં ધૂપદીપૈર્મનોહરૈઃ ।
ભક્ષ્યભોજ્યાદિસંયુક્તૈર્નૈવેદ્યૈશ્ચ હરિં યજેત્ ॥ ૧૯-૨૦॥

એવં દેવાલયે સ્થાપ્ય શોભનં ધ્વજમુત્તમમ્ ।
પ્રદક્ષિણમનુવ્રજ્ય સ્તોત્રમેતદુદીરયેત્ ॥ ૧૯-૨૧॥

નમસ્તે પુણ્ડરીકાક્ષ નમસ્તે વિશ્વભાવન ।
નમસ્તેઽસ્તુ હૃષીકેશ મહાપુરુષ પૂર્વજ ॥ ૧૯-૨૨॥

યેનેદમખિલં જાતં યત્ર સર્વં પ્રતિષ્ઠિતમ્ ।
લયમેષ્યતિ યત્રૈવ તં પ્રપન્નોઽસ્મિ કેશવમ્ ॥ ૧૯-૨૩॥

ન જાનન્તિ પરં ભાવં યસ્ય બ્રહ્માદયઃ સુરાઃ ।
યોગિનો યં ન પશ્યન્તિ તં વન્દે જ્ઞાનરૂપિણમ્ ॥ ૧૯-૨૪॥

અન્તરિક્ષં તુ યન્નાભિર્દ્યૌર્મૂર્દ્ધા યસ્ય ચૈવ હિ ।
પાદોઽભૂદ્યસ્ય પૃથિવી તં વન્દે વિશ્વરૂપિણમ્ ॥ ૧૯-૨૫॥

યસ્ય શ્રોત્રે દિશઃ સર્વા યચ્ચક્ષુર્દિનકૃચ્છશી ।
ઋક્સામયજુષી યેન તં વન્દે બ્રહ્મરૂપિણમ્ ॥ ૧૯-૨૬॥

યન્મુખાદ્બ્રાહ્મણા જાતા યદ્બાહોરભવન્નૃપાઃ ।
વૈશ્યા યસ્યોરુતો જાતાઃ પદ્ભ્યાં શૂદ્રો વ્યજાયત ॥ ૧૯-૨૭॥

માયાસઙ્ગમમાત્રેણ વદન્તિ પુરુષં ત્વજમ્ ।
સ્વભાવવિમલં શુદ્ધં નિર્વિકારં નિરઞ્જનમ્ ॥ ૧૯-૨૮॥

ક્ષીરબ્ધિશાયિનં દેવમનન્તમપરાજિતમ્ ।
સદ્ભક્તવત્સલં વિષ્ણું ભક્તિગમ્યં નમામ્યહમ્ ॥ ૧૯-૨૯॥

પૃથિવ્યાદીનિ ભૂતાનિ તન્માત્રાણીન્દ્રિયાણિ ચ ।
સૂક્ષ્માસૂક્ષ્માણિ યેનાસંસ્તં વન્દે સર્વતોમુખમ્ ॥ ૧૯-૩૦॥

યદ્બ્રહ્મ પરમં ધામ સર્વલોકોત્તમોત્તમમ્ ।
નિર્ગુણં પરમં સૂક્ષ્મં પ્રણતોઽસ્મિ પુનઃ પુનઃ ॥ ૧૯-૩૧॥

અવિકારમજં શુદ્ધં સર્વતોબાહુમીશ્વરમ્ ।
યમામનન્તિ યોગીન્દ્રાઃ સર્વકારણકારણમ્ ॥ ૧૯-૩૨॥

યો દેવઃ સર્વભૂતાનામન્તરાત્મા જગન્મયઃ ।
નિર્ગુણઃ પરમાત્મા ચ સ મે વિષ્ણુઃ પ્રસીદતુ ॥ ૧૯-૩૩॥

હૃદયસ્થોઽપિ દૂરસ્થો માયયા મોહિતાત્મનામ્ ।
જ્ઞાનિનાં સર્વગો યસ્તુ સ મે વિષ્ણુઃ પ્રસીદતુ ॥ ૧૯-૩૪॥

ચતુર્ભિશ્ચ ચતુર્ભિશ્ચ દ્વાભ્યાં પઞ્ચભિરેવ ચ ।
હૂયતે ચ પુનર્દ્વાભ્યાં સ મે વિષ્ણુઃ પ્રતીદતુ ॥ ૧૯-૩૫॥

જ્ઞાનિનાં કર્મિણાં ચૈવ તથા ભક્તિમતાં નૃણામ્ ।
ગતિદાતા વિશ્વમૃગ્યઃ સ મે વિષ્ણુઃ પ્રસીદતુ ॥ ૧૯-૩૬॥

જગદ્ધિતાર્થં યે દેહાઃ ધ્રિયન્તે લીલયા હરેઃ ।
તાનર્ચયન્તિ વિબુધાઃ સ મે વિષ્ણુઃ પ્રસીદતુ ॥ ૧૯-૩૭॥

યમામનન્તિ વૈ સન્તઃ સચ્ચિદાનન્દવિગ્રહમ્ ।
નિર્ગુણં ચ ગુણાધારં સ મે વિષ્ણુઃ પ્રસીદતુ ॥ ૧૯-૩૮॥

ઇતિ સ્તુત્વા નમેદ્વિષ્ણું બ્રાહ્મણાંશ્ચ પ્રપૂજયેત્ ।
આચાર્યં પૂજયેત્પશ્ચાદ્દક્ષિણાચ્છાદનાદિભિઃ ॥ ૧૯-૩૯॥

બ્રાહ્મણાન્ભોજયેચ્છક્ત્યા ભક્તિભાવસમન્વિતઃ ।
પુત્રમિત્રકલત્રાદ્યૈઃ સ્વયં ચ સહ બન્ધુભિઃ ॥ ૧૯-૪૦॥

કુર્વીત પારણં વિપ્ર નારાયણપરાયણઃ ।
યસ્ત્વેતત્કર્મ કુર્વીત ધ્વજારોપણમુત્તમમ્ ।
તસ્ય પુણ્યફલં વક્ષ્યે શ◌ૃણુષ્વ સુસમાહિતઃ ॥ ૧૯-૪૧॥

પટો ધ્વજસ્ય વિપ્રેન્દ્ર યાવચ્ચલતિ વાયુના ।
તાવન્તિ પાપજાલાનિ નશ્યન્ત્યેવ ન સંશયઃ ॥ ૧૯-૪૨॥

મહાપાતકયુક્તો વા યુક્તો વા સર્વપાતકૈઃ ।

ધ્વજં વિષ્ણુગૃહે કૃત્વા મુચ્યતે સર્વપાતકૈઃ ॥ ૧૯-૪૩॥

યાવદ્દિનાનિ તિષ્ઠેત ધ્વજો વિષ્ણુગૃહે દ્વિજ ।
તાવદ્યુગસહસ્રાણિ હરિસારૂપ્યમશ્નુતે ॥ ૧૯-૪૪॥

આરોપિતં ધ્વજં દૃષ્ટ્વા યેઽભિનન્દન્તિ ધાર્મિકાઃ ।
તેઽપિ સર્વે પ્રમુચ્યન્તે મહાપાતકકોટિભિઃ ॥ ૧૯-૪૫॥

આરોપિતો ધ્વજો વિષ્ણુગૃહે ધુન્વન્પટં સ્વકમ્ ।
કર્તુઃ સર્વાણિ પાપાનિ ધુનોતિ નિમિષાર્દ્ધતઃ ॥ ૧૯-૪૬॥

યસ્ત્વારોપ્ય ગૃહે વિષ્ણોર્ધ્વજં નિત્યમુપાચરેત્ ।
સ દેવયાનેન દિવં યાતીવ સુમતિર્નૃપઃ ॥ ૧૯-૪૭॥

ઇતિ શ્રીબૃહન્નારદીયપુરાણે પૂર્વભાગે પ્રથમપાદે
વ્રતાખ્યાને ધ્વજારોપણં નામૈકોનવિંશોઽધ્યાયઃ ।

બૃહન્નારદીયપુરાણ । પૂર્વભાગ । અધ્યાય ૧૯/૨૨-૩૮॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 19/22-38..

Proofread by PSA Easwaran

---

*Dhvajarohanavarnanam*

pdf was typeset on October 26, 2024

Please send corrections to *sanskrit@cheerful.com*